द्विजोत्तमः ! दीयमानां प्रपश्यन्ति तेऽपि यान्ति परां गतिम् । दश पूर्वान् दश परानात्मानञ्चैकविंशकम् । विष्णुलोकमवाप्नोति यावदाहूतसंप्लवम् । दाता च दायकाश्चैव तेऽपि यान्ति परां गतिम् । यत्र मधुवहा नद्यो यत्र पायसकर्द्दमाः । ऋषयो मुनयं सिद्धास्तत्र गच्छन्ति धेनुदाः । य इदं शृणुयाद्भक्त्या श्रावयेद्वापि मानवः । सोऽश्वमेधफलं प्राप्य विष्णुलोकं स गच्छति" । इतधेनुविधिवत् सर्वमत्र कार्य्यम् ।

**दधिपयस्** न० द्वि०व० । दधि च पयश्च । "जातिरप्राणिनाम्" पा० अप्राणिजातित्वात् समाहारद्वन्द्वे प्राप्ते "न दधिपय आदीनि" पा० तन्निषेधः दधिपयसी ।

**दधिपयआदि** न० समाहारद्वन्द्वनिषेधनिमित्ते शब्दद्वयगणभेदे । स च गणः पा०ग०सूत्रे उक्तो यथा "दधिपयसी सर्पिर्मधुनी मधुसर्पिषी ब्रह्मप्रजापती शिववैश्रवणौ स्कन्दविशाखौ परिव्राट्कौशिकौ प्रवर्ग्योपसदौ शुक्लकृष्णौ इध्माबर्हिषी दीक्षातपसी श्रद्धातपसी मेधातपसी अध्ययनतपसी उलूखलमुसले आद्यवसाने श्रद्धामेधे ऋक्सामे वाङ्मनसे" ।

**दधिपुष्पिका** स्त्री दधीव शुभ्रं पुष्पमस्याः कप् अत इत्वम् । श्वेतापराजितायाम् राजनि० ।

**दधिपुष्पी** स्त्री दधीव शुभ्रं पुष्पमस्याः जातित्वात् ङीष् । कोलशिम्ब्यां राजनि० ।

**दधिपूप** पु० दधियुक्तः पूपः । अपूपभेदे । "शालिपिष्टं युतं दध्ना मर्द्दयित्वा घृते पचेत् । वेष्टयेत् पक्वखण्डेन सुवृत्तं दधिपूपकम् । दधिपूपो गुरुर्वृष्यो वृंहणोऽनिलपित्तहा । रुच्योऽग्निजननश्चैव विशेषाद्रुचिकारकः" पाकशास्त्रम् ।

**दधिफल** पु० दधीव द्रवः फलेऽस्य । कपित्थे अमरः तद्द्रवस्य दधितुल्याम्लरसत्वात् तथात्वम् । [रत्नमाला ।

**दधिमण्ड** पु० ६त० । दध्नः मस्तुनि (मात) ख्याते पदार्थे ।

**दधिमण्डोद(क)** पु० दधिमण्ड इवोदकमत्र उदकस्य वा उदादेशः । दधिमण्डतुल्यजले समुद्रभेदे । "दधिमण्डोद एवात्र विज्ञेयो वारिजासनः" हेमा० व्र० नक्षत्रदानम् । "उत्तरेषु च कौरव्य ! द्वीपेषु श्रूयते कथा । एवं तत्र महाराज ! ब्रुवतस्तु निबोध मे । घृततोयः समुद्रोऽत्र दधिमण्डोदकः परः । सुरोदः सागरश्चैव तथान्यो जलसागरः" भा० भी० १२ अ० ।

**दधिमुख** पु० १रामसेनाप्रतिवानरभेदे "श्रीमान् दधिमुखो नाम हरिवृद्धोऽतिवीर्य्यवान्" भा०व०२८३अ० ।२नागभेदे "सुरामुखो दधिमुखस्तथा विमलपिण्डकः" भा०आ०३५ अ० सर्पनामोक्तौ दधिवक्त्रादयोऽप्यत्र ।

**दधिवत्** त्रि० दधि अस्त्यत्र मतुप् वेदे मस्य वः । दधियुक्ते "अपूपवान् दधिवांश्चरुरेष सीदतु" अथ० १८।४।१७। लोके तु न मस्य वः दधिमत् इत्येव स्त्रियां ङीप् ।

**दधिवामन** न० १शालग्राममूर्त्तिषु वामनमूर्त्तिभेदे ब्रह्मवै० प्रकृतिख० तल्लक्षणमुक्तं यथा । "अतिक्षुद्रं द्विचक्रञ्च । नवीननीरदोपमम् । दधिवामनकं ज्ञेयं गृहिणाञ्च सुखप्रदम्" । दध्योदने हूतव्यः वामनः । २दध्योदनेन हवनीये वामनभेदे पु० । "दध्योदनेन शुद्धेन हुत्वा मुच्येत दुर्गतः । हुत्वा त्रैविक्रमं रूपं जपेन्मन्त्रमनन्यधीः" तन्त्रसारे दधिवामनप्रयोगः ।

**दधिवारि** न०६त० । दधिमस्तुपदार्थे (दधिर मात) हेमच० ।

**दधिवाहन** पु० अङ्गनामकनृपपुत्रे "अङ्गपुत्रो महानासीत् राजेन्द्रो दधिवाहनः । दधिवाहनपुत्रस्तु राजा दिविरथोऽभवत्" हरिवं० ३१ अ० । दधिवाहनपुत्रस्तु पुत्रो दिविरथस्य तु" भा० शा० ४९ अ० ।

**दधिशोण** पु० वानरे त्रिका० ।

**दधिषाय्य** पु० दधि स्यति सो—आय्य सत्वम् ।१घृते उज्ज्वल० । "दधिषाय्यः" उणा० सू० सि० कौ० इत्तौ "दधातेरायः द्वित्वमित्त्वं षुक्च इत्युक्त्वा "मित्रावसो दधिषाय्य" इत्युदाजहार" ।

**दधिसक्तु** पु० ब० व० । "दध्युपसिक्ताः सक्तवः "अन्नेन व्यञ्जनम्" पा०समासः । दध्युपसिक्तेषु सक्तुषु । "कन्दुपक्वानि तैलेन पायसं दधिसक्तवः" ति० त०कूर्म्मपु० ।

**दधिसार** पु० ६त० । नवनीते हेमच० ।

**दधिस्कन्द** पु० तीर्थभेदे ।

**दधिस्नेह** पु० ६त० । दधिसारे त्रिका० ।

**दधिस्य(ध्यस्य)** अतिगार्द्ध्येन दधीच्छति क्यचिक् अस्तुक् वा । अतिगार्द्ध्येन दधीच्छायायां प० अक० सेट् । दधिस्यति दध्यस्यति ।

**दधिस्वेद** पु० दध्नः स्वेद इव । तक्रे (घोल) जटाधरः ।

**दधी(च)चि** पु० अथर्वमुनेरौरसे कर्द्दमप्रजापतिकन्यायां शान्तिनाम्न्यां जाते मुनिभेदे । इन्द्रयाचितेन तेन च प्राणांस्त्यक्त्वा स्वदेहास्थीनि दत्तानि इन्द्रेण च तैर्वज्रं निर्माय वृत्रासुरो निहतः तत्कथा

"अतोऽस्थिभिर्दधीचस्य न हन्तुं त्रिदशद्विषः । तस्मा-